# vainAyaka trishati

# वैनायक त्रिशति

## Document Information

Text title : Vainayaka Trishati

File name : vainAyakatrishati.itx

Category : ganesha, trishati, shati

Location : doc_ganesha

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran, Aruna Narayanan

Description-comments : See corresponding nAmAvalI

Latest update : June 1, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 1, 2023

*sanskritdocuments.org*

# वैनायक त्रिशति

॥ श्रीगणेशनामत्रिशतीस्तोत्रम् ॥

॥ ॐ गं गणपतये नमः ॥

सूर्य उवाच —
एकार्णमन्त्रवत्सर्वं ऋष्यादिकमुदीरितम् ।
छन्दोऽनुष्टुप् कीर्तितं च स्वानन्देशस्तु देवता ॥ १॥

गणेश्वरो गणक्रीडो गणनाथो गणाधिपः ।
गजाननो गणपतिर्नित्यानित्यो निरामयः ॥ २॥

निर्मलो निष्कलो नित्यो नादमध्ये प्रतिष्ठितः ।
निधिर्निधिप्रियपतिर्नादातीतो निधिप्रदः ॥ ३॥

नदीनदभुजो नादजनको विघ्ननायकः ।
विनायको विरूपाक्षो वरदो विश्वपालकः ॥ ४॥

विघ्नकृन्विघ्नचरणो गजदन्तो गजध्वनिः ।
गणराजो गणश्रीदो गणपूज्यो गणेष्टदः ॥ ५॥

नागाननो निम्ननाभिर्नित्यानन्दो निरङ्कुशः ।
नलिनीकामुको नित्यं नित्यानित्यावतंसितः ॥ ६॥

पूर्णानन्दः परन्धाम परमात्मा परात्परः ।
परं पदं पशुपतिस्तत्त्वं पदनिरूपितः ॥ ७॥

तत्त्वानां परमं तत्त्वं तारकस्तारकान्तकः ।
तारकान्तरसंस्थानस्तारकान्तकपूर्वजः ॥ ८॥

हिरण्मयपुरान्तस्थो हृदयालाननिश्चलः ।
हृत्पद्मकर्णिकाशालिवियत्केलिसरोवरः ॥ ९॥

हेरम्बो हवनो हव्यो विधाता विश्वतोमुखः ।

विकर्ता विश्वतश्चक्षुर्वन्द्यो वेदान्तगोचरः ॥ १०॥

मदोत्कटो मयूरेशो मोहिनीशो महाबलः ।
महागणपतिर्मेघनादो हृत्पद्मसंस्थितः ॥ ११॥

हंसो हस्तिपिशाचीशो हृल्लेखामन्त्रमध्यगः ।
हर्षो हव्यकव्यभुक्क कपर्दी कलभाननः ॥ १२॥

कर्मसाक्षी कर्मकर्ता कल्पः कर्माग्रपूजितः ।
वक्रतुण्डो विघ्नराजो विद्यादो विजयस्थिरः ॥ १३॥

विश्वकर्ता विश्वमुखः कामदाता कटङ्कटः ।
कल्पकः कुमारगुरुः किरीटी कुलपालनः ॥ १४॥

वैमुख्यहतदैत्यश्रीर्वराहरदनो वशी ।
वागीश्वरीपतिर्वाचा सिद्धो वायुसुकीलकः ॥ १५॥

नन्दिप्रियो नगसुतानन्दनो निजसंस्थितः ।
नष्टद्रव्यप्रदो नादो नारायणसुपूजितः ॥ १६॥

उच्छिष्टगण उच्छिष्टः उच्छिष्टगणनायकः ।
उपेन्द्र उडुभृन्मौलिरुदारत्रिदशाग्रणीः ॥ १७॥

पद्मप्रसन्ननयनः प्रणताज्ञानमोचनः ।
प्रत्यूहाज्ञानविज्ञानः प्रत्यूहहिमहव्यभुक् ॥ १८॥

प्रत्यूहाम्भोधिकालाग्निः प्रत्यूहगरलामृतः ।
मृत्युञ्जयो मुक्तिदाता महानादो मदोत्कटः ॥ १९॥

मदनावत्याश्रिताङ्घ्रिर्मुद्गरायुधधारकः ।
शाकलश्शम्भुतनयः शक्तिजश्शम्भुहास्यभूः ॥ २०॥

शिवासुखावहश्शम्भुतेजोभूश्शम्भुकोपहा ।
वाणीजिह्वो व्योमनाभिः वाग्मी वासवनासिकः ॥ २१॥

वैनायकीसहचरो विधूतालिसमूहकः ।
स्तवस्स्तुतिपरस्स्तव्यस्स्तुतितुष्टस्स्तुतिप्रियः ॥ २२॥

महालक्ष्मीप्रियतमो मातुलिङ्गधरो महान् ।
मदनावत्याश्रिताङ्घ्रिर्महाबुद्धिमनोरमः ॥ २३॥

मोहिनीमोहनो ज्येष्ठो ज्येष्ठराजो जगन्मयः ।
ज्येष्ठपूजितो ज्येष्ठेशो ज्येष्ठराजपदे स्थितः ॥ २४॥

षडक्षरष्षडाधारष्षड्चक्रोपरि संस्थितः ।
षडृतुकुसुमस्रग्वी षण्मुखष्षण्मुखाग्रजः ॥ २५॥

रौद्रीमुद्रितपादाब्जो रुष्टचित्तप्रसादनः ।
रुद्रप्रियो रुद्रपत्नीपुत्रो रुद्रशिरोधरः ॥ २६॥

रत्नमण्डपमध्यस्थो जपपूजनतोषितः ।
जप्यो जपो जपपरो जिह्वासिंहासनप्रभुः ॥ २७॥

जितेन्द्रियेष्टसन्दाता ब्रह्मेशो ब्रह्मणस्पतिः ।
ब्रह्माण्डकुम्भो ब्रह्मस्थो ब्रह्मचारी बृहस्पतिः ॥ २८॥

हंसो हरो हस्तिपतिः हर्षदो हव्यकव्यभुक् ।
हादिविद्याशक्तिपतिर्हृल्लेखामन्त्रमध्यगः ॥ २९॥

नामपारायणप्रीतो नामनिष्ठवरप्रदः ।
नार्मदार्चनसन्तुष्टो नागेन्द्रतनयो नटः ॥ ३०॥

निजानन्दसन्निषण्णो बालकेलिकुतूहली ।
ब्रह्ममूर्द्धा ब्रह्ममुखो ब्रह्माण्डावलिमेखलः ॥ ३१॥

बृहदारण्यसंवेद्यो ब्रह्मणां ब्रह्मणस्पतिः ।
मयूरनायको मायापतिर्मूषकवाहनः ॥ ३२॥

मन्दारपूजनप्रीतो मन्दारकुसुमप्रियः ।
मन्दारमूलसञ्जातो नागभूषणभूषितः ॥ ३३॥

नागहारकटीसूत्रो नागयज्ञोपवीतवान् ।
नागराजयोगदाता नागकन्यासुशान्तिदः ॥ ३४॥

नारायणार्चितपदः संयोगानन्दविग्रहः ।
सृष्टिस्थितिलयक्रीडस्सर्वभेषजभेषजम् ॥ ३५॥

सिन्दूरितमहाकुम्भस्सामगानरतस्सुखी ।
तत्पदस्तत्पदाराध्यस्तत्पदार्थस्वरूपवान् ॥ ३६॥

तत्त्वमस्याकृतिधरस्तत्त्वमस्यर्थविग्रहः ।
तत्त्वमस्यर्थसंवेद्यो ह्यानन्दमूर्तिधारकः ॥ ३७॥

आधारपीठ आमोद आश्रिताभीष्टदायकः ।
आदिमध्यान्तरहितः आखुराजमहारथः ॥ ३८॥

निजभक्तप्रियतमो नरनारायणार्चितः ।
नारायणश्री पूर्वाङ्गो नटराजसुपूजितः ॥ ३९॥

निरालम्बयोगगम्यो निदिध्यासवरप्रियः ।
श्रीङ्कारशक्तिसंयुक्तः श्रीपतिर्श्रीनिकेतनः ॥ ४०॥

श्रीङ्कारविग्रहश्श्रीदश्श्रीसिद्धिबुद्धिविनायकः ।
विराड् विश्वो वेदपतिर्वेदकर्ता विराट् सुतः ॥ ४१॥

विराड्वतिरूर्ध्वलोकगत ऊर्ध्वविनायकः ।
ऊर्जस्वानूष्मलमद ऊहापोहदुरासदः ॥ ४२॥

ऊनषोडशवर्षाढ्यस्तिर्यग्गतिविनाशकः ।
तिथिमात्रसुसम्पूज्यस्स्थितिमात्रवरप्रदः ॥ ४३॥

तत्त्वेष्टदस्तत्त्वपतिस्तत्त्वातत्त्वविवेकदः ।
भीमरूपो भूतपतिर्भूपतिर्भुवनेश्वरः ॥ ४४॥

भ्रूक्षेपदत्तलक्ष्मीको भूतिदस्सोमभूषणः ।
स्वतन्त्रस्सत्यसङ्कल्पस्सत्यसङ्कल्पदायकः ॥ ४५॥

स्वसंवेद्यश्च सर्वज्ञो दण्डभृद्दण्डनायकः ।
दक्षयज्ञप्रमथनो दयावान् दैत्यमोहनः ॥ ४६॥

दिव्यवैभवसन्दाताऽसुरकुञ्जरभेदनः ।
साक्षी समुद्रमथनस्सदसद्व्यक्तिदायकः ॥ ४७॥

स्वसंवेद्यासम्प्रज्ञातयोगगम्यस्वदक्षिणः ।
दन्तप्रभिन्नाभ्रमालो देवार्थनृगजाकृतिः ॥ ४८॥

दंष्ट्रालग्नद्विपघटो दैत्यवारणदारणः ।
दुरासदगर्वहरो दिवोदासवरप्रदः ॥ ४९॥

नेतिकर्ता नेतिपदो नेतिब्रह्मवरप्रदः ।
नेतिस्वानन्दपददो नेतिशक्तिसमन्वितः ॥ ५०॥

नेत्यसम्प्रज्ञातमययोगलभ्यसुविग्रहः ।

ओङ्कारशक्तिसहितः ओङ्कारमुखराजितः ॥ ५१॥

ओङ्कारवाच्य ओङ्कार ओङ्कारपूर्णविग्रहः ।
ओङ्कारमयविश्वात्मा गङ्कारमन्त्रविग्रहः ॥ ५२॥

गङ्कारजपसन्तुष्टो गङ्कारभूमरूपवान् ।
गङ्कारो गम्मन्त्रवेद्यो गम्ब्रह्मस्थितिदायकः ॥ ५३॥

इदं वैनायकं नाम्नां त्रिशति श्रुतिकीर्तितम् ।
ऋङ्मन्त्रसम्भवं वेदसारं गणककीर्तितम् ॥ ५४॥

इदं ब्राह्मे मुहूर्ते वा जपान्ते देवसन्निधौ ।
प्रातर्मध्यन्दिने सायं पूजान्ते वाऽथ यः पठेत् ॥ ५५॥

धनधान्यं पशून् पुत्रान् रूपं विद्यां बलं श्रियम् ।
आरोग्यं धर्ममर्थं च कामं मोक्षमवाप्नुयात् ॥ ५६॥

अयुतावर्तनादस्य भवेत्सिद्धिर्निरन्तरम् ।
एकाक्षरं समुच्चार्य चतुर्थ्यन्तं तु नाम वै ॥ ५७॥

स्वाहापदं समुच्चार्य होमः कार्यो विधानतः ।
द्वितीयान्तं तर्पणं तु तर्पयामीति शब्दतः ॥ ५८॥

तथैव मार्जनं कार्यं मार्जयामीति तत्परम् ।
पुरश्चर्यां नरः कृत्वा भुक्तिं मुक्तिमवाप्नुयात् ॥ ५९॥

(विनायकरहस्ये)

इति विनायकरहस्ये ग्रन्थे ज्ञानसारं प्रथमभागे
नारदादि मुनीनां सूर्यभगवता प्रोक्ता
त्रयोदशाध्यायान्तर्गता वैनायक त्रिशति समाप्ता ।

Narrated by Soorya Bhagavaan to Naarada and other Rishis.
Contained in Chapter 13 of Part-1 of JnaanasaaraM in the book Vinaayakarahasyam

Encoded by PSA Easwaran
Proofread by PSA Easwaran, Aruna Narayanan

*vainAyaka trishati*

pdf was typeset on June 1, 2023

Please send corrections to *sanskrit@cheerful.com*